श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकृष्णमङ्गळम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीकृष्णमङ्गळम् ॥

मङ्गळं बालकृष्णाय दिव्यलीलाय मङ्गळम्।
मङ्गळं नीलवर्णाय मातृमान्याय मङ्गळम् ॥ 1 ॥

मङ्गळं रुक्मिणीशाय जगदीशाय मङ्गळम्।
मङ्गळं यदुनाथाय दीननाथाय मङ्गळम् ॥ 2 ॥

मङ्गळं देवदेवाय वासुदेवाय मङ्गळम्।
मङ्गळं नन्दपुत्राय सदानन्दाय मङ्गळम् ॥ 3 ॥

मङ्गळं पूतनाहन्त्रे लीलामर्त्याय मङ्गळम्।
मङ्गळं शकटच्छेत्रे पद्मपादाय मङ्गळम् ॥ 4 ॥

मङ्गळं वत्सपालाय विश्वपालाय मङ्गळम्।
मङ्गळं योगिमृग्याय गोपमित्राय मङ्गळम् ॥ 5 ॥

मङ्गळं बालगोपाय ब्रह्मविद्याय मङ्गळम्।
मङ्गळं कमलाभर्त्रे गोपीकान्ताय मङ्गळम् ॥ 6 ॥

मङ्गळं मातृबद्धाय जडघ्नायास्तु मङ्गळम्।
मङ्गळं क्रीडते स्त्रीभिः कुन्दारूढाय मङ्गळम् ॥ 7 ॥

मङ्गळं द्विषते क्रूरान् प्रियाक्रूराय मङ्गळम्।
मङ्गळं वल्लवीभर्त्रे कंसघ्नायास्तु मङ्गळम् ॥ 8 ॥

मङ्गळं प्रीतभक्ताय विद्यावासाय मङ्गळम्।
मङ्गळं मागधजिते द्वारकेशाय मङ्गलम् ॥ 9 ॥

मङ्गळं पार्थसुहृदे जितदैत्याय मङ्गळम्।
मङ्गळं रुक्मिणीजाने रुक्मिणीशाय मङ्गळम्॥ **10**॥

मङ्गळं नैकरूपाय नरदैत्याय मङ्गळम्।
पुत्रिणे नित्यरूपाय ब्रह्माचार्याय मङ्गळम्॥ **11**॥

मङ्गळं द्रौपदीड्याय मानदायास्तु मङ्गळम्।
मङ्गळं प्रियभक्ताय भक्तपालाय मङ्गळम्॥ **12**॥

मङ्गळं दिशते कामान् विप्रप्रार्थ्याय मङ्गळम्।
मङ्गळं शिष्टपालाय भारघ्नायास्तु मङ्गळम्॥ **13**॥

मङ्गळं मायिनेऽमायसारथ्यायास्तु मङ्गळम्।
मङ्गळं पूर्णरूपाय गीताचार्याय मङ्गळम्॥ **14**॥

मङ्गळं विश्वरूपाय योगिध्येयाय मङ्गळम्।
मङ्गळं विश्वगुरवे कृपावासाय मङ्गळम्॥ **15**॥

मङ्गळं ज्ञानरूपाय सर्वाभिज्ञाय मङ्गळम्।
मङ्गळं सर्वशक्ताय महासत्त्वाय मङ्गळम्॥ **16**॥

मङ्गळं दिव्यवीर्याय माहैश्वर्याय मङ्गळम्।
मङ्गळं तेऽच्युताय सत्कुलत्राणाय मङ्गळम्॥ **17**॥

॥ इति श्रीकृष्णमङ्गळं समाप्तम्॥